# मम पुस्तकम्

नाम – ______________________________

पत्रसङ्केतः – ______________________________

______________________________

चल-दूरवाणी-सङ्ख्या – ______________________________

### वार्तालापाय

सहभागिभिः सह कृषिकर्म-विषये कृषिक्षेत्रविषये च चर्चां कुर्वन्तु। तान् पृच्छन्तु – १. अधः प्रदत्ते चित्रे कति शय्याः सन्ति ? २. चित्रे आहत्य कति जनाः दृश्यन्ते ? ३. कति जन्तवः सन्ति ? ४. कति वृक्षाः दृश्यन्ते ?





# ४ अस्माकं परिवेशः

**वयं ज्ञास्यामः**

| ए | ऐ | क | ज | भ | ड | श | ष | अं | अँ |
|---|---|---|---|---|---|---|---|---|---|

- ३ अङ्कानां संख्यानां परिचयम्।
- पठनं लेखनं च।
- दीर्घतायाः, भारस्य धारितायाः च मापनम्।
- २ अङ्कीय-सङ्ख्यानां १ अङ्कीयसङ्ख्याभिः गुणनम्।
- विभाजनस्य अवबोधनम्।

## चित्रं दृष्ट्वा पठामः-

१

एकम्



कण्ठाभरणम्



कूपः



जन्तवः

**शिक्षक-निर्देशः** - शिक्षकः/शिक्षिका उपरि लिखितानां शब्दानां पठने सहयोगं कुर्यात्, शिक्षार्थिनः चित्रस्य आधारेण न केवलम् अनुमानम् अपि तु अवगतानां शब्दानां तथा अक्षराणाम् अपि उपयोगं कुर्युः।

## अक्षराणि पठन्तु लिखन्तु च -

ए



ऐ



**ए**कतायां शक्तिः अस्ति।

**ऐ**रातवतः इन्द्रस्य वाहनम् अस्ति।

ज



भ



गणेशाय **ज**म्बूफलं रोचते।

**भ**ल्लूकः जङ्गले निवसति।

श



ष



अर्जुनस्य **शङ्**खस्य नाम देवदत्तः अस्ति।

कृषकः महि**षीं** पालयति।

श

ष

ड



**ड**मरुः **ड**म् **ड**म् करोति।

ड

| पाठशाला | कूपः | कोषः | उद्यानम् |
| --- | --- | --- | --- |
| .............................. | .............................. | .............................. | .............................. |

■ **चित्रस्य विषये कानिचन त्रीणि वाक्यानि लिखामः -**



पश्यन्तु लिखन्तु च -

१. ________________________________________

२. ________________________________________

३. ________________________________________

## योजयाम: -

| | | | |
|---|---|---|---|
| ७४१ | ६८५ | १३५ | ४३७ |
| + १३२ | + ११४ | + २३२ | + १४२ |
| ____ | ____ | ____ | ____ |

- रवि: ४३५ रूप्यकै: तण्डुलम् एवञ्च १३२ रूप्यकै: शर्करां क्रीतवान्। तेन आपणिकाय कति रूप्यकाणि दत्तानि ?

---

## व्यवकलनं कुर्म: -

| | | | |
|---|---|---|---|
| ७३९ | ७३५ | ८९५ | ४३६ |
| – २२५ | – १२३ | – २४२ | – ११५ |
| ____ | ____ | ____ | ____ |

- रेखाया: पार्श्वे ८४५ रूप्यकाणि आसन्। तया ४२० रूप्यकै: मधु क्रीतम्। तस्या: पार्श्वे कति रूप्यकाणि अवशिष्टानि ?

---

## मापनम् -

**स्मर्तव्यम्**

१ से.मी. = १० मिलीमीटर-परिमितम्
१०० से.मी. = १ मीटर-परिमितम्
१००० से.मी. = १ किलोमीटर-परिमितम्



- भित्तौ चिह्नद्वयं कुर्वन्तु ययोः मध्ये दूरता १ मीटर-परिमिता भवेत् ।
- स्वमित्रस्य साहाय्येन स्वस्य मित्रस्य च औन्नत्यं मापयन्तु ।

---

## विचिन्त्य रिक्तस्थानानि पूरयामः -

- द्वयोः नगरयोः मध्ये दूरता__________इत्यनेन मापयामः ।
- वस्त्राणि__________ इत्यनेन मापयामः ।




## रिक्तस्थानानि पूरयामः -

- ३००० मी. = __________ कि.मी.
- ७०० से.मी. = __________मी.
- ४० मि.मी. = __________ से.मी.
- ५ कि.मी. = __________ मी.
- ६ मी. = __________से.मी.
- ७ से.मी. = __________मि.मी.



- अनीता एकस्मिन् दिने १८० कि.मी. तथा अन्यस्मिन् दिने १८२ कि.मीटर-परिमितं कारयानं चालितवती । आहत्य सा कियत् दूरं (कि.मीटर-परिमितं) कारयानं चालितवती ?

---

- चित्रा ८५४ मीटरपरिमितात् वस्त्रात् ६३२ मीटर-परिमितस्य वस्त्रस्य विक्रयणं कृतवती । अधुना तस्याः पार्श्वे कियत् वस्त्रम् अवशिष्टम् अस्ति ?

---

## ■ आगच्छन्तु, भारस्य विषये जानीमः -

| | | |
|---|---|---|
| १ किलोपरिमितम् | = | १००० ग्रामपरिमितम् |
| अर्धकिलोपरिमितम् | = | ५०० ग्रामपरिमितम् |
| चतुर्थांशपरिमितम् | = | २५० ग्रामपरिमितम् |

गुरुतमस्य वस्तुनः भारं मापयितुं बृहत्तमानां मापकानाम् उपयोगः भवति ।




## ■ रिक्तस्थानानि पूरयामः -

- ४ किलोग्राम-परिमितम् = ____________________ ग्राम-परिमितम्
- ७००० ग्राम-परिमितम् = ____________________ किलोग्राम-परिमितम्
- २ किलोग्राम ५०० ग्रामपरिमितम् = ____________________ ग्राम--परिमितम्

- विजयस्य एकस्मिन् क्षेत्रे ३१२ किलोग्राम-परिमितानि आलूकानि तथा अपरस्मिन् २३६ किलो-ग्रामपरिमितानि आलूकानि अभवन् । विजयस्य क्षेत्रयोः आहत्य कियत् किलोग्राम-परिमितम् उत्पादनम् अभवत् ?

____________________________________________

- हरिः ४९५ किलोग्राम-परिमितेभ्यः तण्डुलेभ्यः २९२ किलोग्राम-परिमितानां तन्डुलानां विक्रयणं कृतवान् । अधुना तस्य पार्श्वे कति किलोग्राम-परिमितानि तण्डुलानि अवशिष्टानि?

- ५ कि.ग्रा. गोधूमाः ₹१०० रूप्यकैः लभ्यन्ते, तर्हि २५ कि.ग्रा. गोधूमानां मूल्यं कियत् भवेत् ?




- २५ कि.ग्रा. गोधूमं क्रेतुं भवन्तः/भवत्यः कानि-कानि कति च धनपत्रकानि दास्यन्ति ? लिखन्तु-

## शारदा शाकानि क्रेतुं विपणिं गतवती । गणनां कुर्वन्तु, सा कतिभिः रूप्यकैः शाकानि क्रीतवती ?

| क्रमः | शाकानां नामानि | मूल्यम् प्रति-कि.ग्रा. | मात्रा | दत्तम्/देयम् (मूल्यम्) |
|---|---|---|---|---|
| १ | आलुकम् | २० | २ कि.ग्रा. | |
| २ | पलाण्डुः | १५ | १ कि.ग्रा. | |
| ३ | रक्ताङ्गम् | २५ | ३ कि. ग्रा. | |
| ४ | तुम्बी | १० | अर्धं कि.ग्रा. | |
| | | | **रूप्यकाणि** | |

**शिक्षक-निर्देशः-** शिक्षकः/शिक्षिका सहभागिनः प्रेरयेत् यत् ते वस्तूनां क्रयणानन्तरम् आपणिकात् व्ययपत्रकम् अवश्यं स्वीकुर्युः । व्ययपत्रकस्य उपयोगः कः ? इति अस्मिन् विषये चर्चां च कुर्युः । यदि भवन्तः/भवत्यः क्रीतस्य वस्तुनः भारं न्यूनम् इति अनुभवन्ति तदा आपणिकस्य तुलायाः वस्तु-मापनभागस्य परिवर्तनं कृत्वा अपरस्मिन् भागे मापकं संस्थाप्य पुनः मापनं कारयितुं शक्नुवन्ति । यदि आपणिकस्य मापकानि निर्धारित-मानयुतानि न सन्ति तर्हि तस्य परिवादं माननिर्धारकविभागे कर्तुं शक्नुवन्ति ।

## दुग्ध-मापनार्थं पात्राणि -




**स्मर्तव्यम्**

**१ किलोलीटर = १००० लीटर**
**१ लीटर = १००० मिलीलीटर**
**अर्धलीटर = ५०० मिलीलीटर**

किलोलीटर-इत्येतदर्थं कि.ली. लीटर-इत्येतदर्थं ली. एवञ्च मिलीलीटर-इत्येतदर्थं मि.ली. इति लिख्यते।



## योजयामः -

| | |
|---|---|
| ४ २ ५ लीटर | ५ १ २ लीटर |
| + २ २ ३ लीटर | + ३ २ ७ लीटर |
| ______ | ______ |

## व्यवकलनं कुर्मः -

| | |
|---|---|
| ९ ९ ९ लीटर | ५ ५ ६ लीटर |
| – ३ २ २ लीटर | – २ ३ ५ लीटर |
| ______ | ______ |

- सुनीता प्रथमे दिने १३२ लीटर-परिमितस्य द्वितीये दिने च २४२ लीटर-परिमितस्य दुग्धस्य विक्रयणं कृतवती । आहत्य सुनीता कियत् लीटर-परिमितस्य दुग्धस्य विक्रयणं कृतवती ?

---

- जलभाण्डे ८९९ लीटर-परिमितं जलम् आसीत् । ६४५ लीटर-परिमितस्य जलस्य उपयोगः कृतः । अधुना जलभाण्डे कियत् जलम् अस्ति ?

---

- १ लीटर-परिमितायाः कूप्याः २५० मिलीलीटर-परिमिताः कति कूपीः पूरयितुं शक्यन्ते ?

---

- उमा-द्वारा चत्वारि दिनानि यावत् प्रतिदिनं ५ मिलीलीटर-परिमितम् औषधं पातव्यम् । उमायाः कृते १० दिनेषु कियत् औषधम् आवश्यकं भवेत् ?

---





## स्वहस्तयोः अङ्गुलीः गणयन्तु -



द्वयोः हस्तयोः कति अङ्गुल्यः सन्ति  २ × ५ = १०



१२  हस्तानाम्  ५ अर्थात्

१२ × ५ अथवा

```
  १२
× ५
_____

_____
```

## गुणनं कुर्मः -

| | | |
|---|---|---|
| १ ३ | १ १ | १ ४ |
| × ६ | × ५ | × ८ |
| ______ | ______ | ______ |

- एकस्मिन् युतके षट्-कुडुपाः (बटन) सन्ति, तर्हि पञ्च-युतकेषु कति कुडुपाः भविष्यन्ति ?

______________________________

**सुन्दरस्य समीपे ४० बीघापरिमिता भूमिः अस्ति। सुन्दरस्य शीला सुशीलः च द्वौ बालकौ स्तः। द्वयोः कृते भूमेः समानं विभाजनम् अभवत्। आगच्छन्तु, चित्रे पश्यामः वंशपरम्परायाम् अग्रे भूमेः विभाजनं कथम् अभवत् ?**




- **४० इत्यस्य समानं भागद्वयं कृतम्** ४० ÷ २ = ____
- **२० इत्यस्य समानं भागचतुष्टयं कृतम्** २० ÷ ४ = ____
- **२० इत्यस्य समानं भागद्वयं कृतम्** २० ÷ ____ = १०

**शिक्षक-निर्देशः –** भूमेः अथवा अन्य-वस्तुनः समानरूपेण विभजनं कृत्वा विभजनस्य प्रकारविषये चर्चां कुर्वन्तु।

# अभ्यास-कार्यम्

## १. प्रदत्तैः शब्दैः शब्दनिर्माणं कुर्मः -

ड – ....................

ज – ....................

झ – ....................

## २. प्रदत्तैः शब्दैः वाक्यानि पूरयामः -

**कूपः, नगरे, भल्लूकः, डमरुः**

१. मम ग्रामे एकः ........... अस्ति ।

२. ........... वने निवसति ।

३. ........... डम, डम, डम इति ध्वनिं करोति ।

४. मम ...........विशालः तडागः वर्तते ।

## ३. चित्रं दृष्ट्वा त्रीणि वाक्यानि लिखामः -



१. ________________________________

२. ________________________________

३. ________________________________

## ४. योजयामः -

| | | |
|---|---|---|
| ७४१ ग्रा. | १३५ मी. | ४२५ ली. |
| + १३२ ग्रा. | + २३२ मी. | + २२३ ली. |
| ______ | ______ | ______ |

## ५. व्यवकलनं कुर्मः -

| | | |
|---|---|---|
| ७३५ ग्रा. | ८९५ मी. | ५५६ ली. |
| - १२३ ग्रा. | - २४२ मी. | - २३५ ली. |
| ______ | ______ | ______ |

## ६. रिक्तस्थानं पूरयामः -

१. ३००० मी. = ____________ कि.मी.

२. ७००० ग्रा. = ____________ कि.ग्रा.

३. ४ कि.ग्रा. = ____________ ग्रा.

४. वस्त्राणां मापनं = ____________ इति परिमाणेन क्रियते ।

## ७. गुणनं कुर्मः -

| | | |
|---|---|---|
| १३ | १५ | १६ |
| × ६ | × ६ | × ६ |
| ______ | ______ | ______ |

**८. कृष्णः ४९५ किलोग्राम-परिमितेभ्यः तण्डुलेभ्यः २९२ किलोग्राम-परिमितानां तण्डुलानां विक्रयणं कृतवान् । अधुना कृष्णस्य पार्श्वे कति किलोपरिमितानि तण्डुलानि अवशिष्टानि ?**

________________________________________

________________________________________